# ॥ स्वयम्प्रभा-मोक्षः ॥

यूयं पिदध्वमक्षीणि गमिष्यथ बहिर्गुहाम्।
तथैव चक्रुस्ते वेगाद्गताः पूर्वस्थितं वनम्॥ ५८॥

साऽपि त्यक्त्वा गुहां शीघ्रं ययौ राघवसन्निधिम्।
तत्र रामं ससुग्रीवं लक्ष्मणं च ददर्श ह॥ ५९॥

कृत्वा प्रदक्षिणं रामं प्रणम्य बहुशः सुधीः।
आह गद्गदया वाचा रोमाञ्चिततनूरुहा॥ ६०॥

## स्वयम्प्रभोवाच

दासी तवाहं राजेन्द्र दर्शनार्थमिहाऽऽगता।
बहुवर्षसहस्राणि तप्तं मे दुश्चरं तपः॥ ६१॥

गुहायां दर्शनार्थं ते फलितं मेऽद्य तत्तपः।
अद्य हि त्वां नमस्यामि मायायाः परतः स्थितम्॥ ६२॥

सर्वभूतेषु चालक्ष्यं बहिरन्तरवस्थितम्।
योगमायाजवनिकाच्छन्नो मानुषविग्रहः॥ ६३॥

न लक्ष्यसेऽज्ञानदृशां शैलूष इव रूपधृक्।
महाभागवतानां त्वं भक्तियोगविधित्सया॥ ६४॥

अवतीर्णोऽसि भगवन् कथं जानामि तामसी।
लोके जानातु यः कश्चित् तव तत्त्वं रघूत्तम॥ ६५॥

ममैतदेव रूपं ते सदा भातु हृदालये।
राम ते पादयुगलं दर्शितं मोक्षदर्शनम्॥ ६६॥

अदर्शनं भवार्णानां सन्मार्गपरिदर्शनम्।
धनपुत्रकलत्रादिविभूतिपरिदर्पितः ।
अकिञ्चनधनं त्वाऽद्य नाभिधातुं जनोऽर्हति॥ ६७॥

निवृत्तगुणमार्गाय निष्किञ्चनधनाय ते॥ ६८॥ ॥ ६८॥

नमः स्वात्माभिरामाय निर्गुणाय गुणात्मने।
कालरूपिणमीशानमादिमध्यान्तवर्जितम् ॥ ६९॥

समं चरन्तं सर्वत्र मन्ये त्वां पुरुषं परम्।
देव ते चेष्टितं कश्चिन्न वेद नृविडम्बनम्॥ ७०॥

न तेऽस्ति कश्चिद्दयितो द्वेष्यो वाऽपर एव च।
त्वन्मायापिहितात्मानस्त्वां पश्यन्ति तथाविधम्॥ ७१॥

अजस्याकर्तुरीशस्य देवतिर्यङ्नरादिषु।
जन्मकर्मादिकं यद्यत्तदत्यन्तविडम्बनम्॥ ७२॥

त्वामाहुरक्षरं जातं कथाश्रवणसिद्धये।
केचित्कोसलराजस्य तपसः फलसिद्धये॥ ७३॥

कौसल्यया प्रार्थ्यमानं जातमाहुः परे जनाः।
दुष्टराक्षसभूभारहरणायार्थितो विभुः॥ ७४॥

ब्रह्मणा नररूपेण जातोऽयमिति केचन।
शृण्वन्ति गायन्ति च ये कथास्ते रघुनन्दन॥ ७५॥

पश्यन्ति तव पादाब्जं भवार्णवसुतारणम्।
त्वन्मायागुणबद्धाहं व्यतिरिक्तं गुणाश्रयम्॥ ७६॥

कथं त्वां देव जानीयां स्तोतुं वाऽविषयं विभुम्।
नमस्यामि रघुश्रेष्ठं बाणासनशरान्वितम्।
लक्ष्मणेन सह भ्रात्रा सुग्रीवादिभिरन्वितम्॥ ७७॥

एवं स्तुतो रघुश्रेष्ठः प्रसन्नः प्रणताघहृत्।
उवाच योगिनीं भक्तां किं ते मनसि काङ्क्षितम्॥ ७८॥

सा प्राह राघवं भक्त्या भक्तिं ते भक्तवत्सल।
यत्र कुत्रापि जाताया निश्चलां देहि मे प्रभो॥ ७९॥

त्वद्भक्तेषु सदा सङ्गो भूयान्मे प्राकृतेषु न।
जिह्वा मे रामरामेति भक्त्या वदतु सर्वदा॥ ८०॥

मानसं श्यामलं रूपं सीतालक्ष्मणसंयुतम्।
धनुर्बाणधरं पीतवाससं मुकुटोज्ज्वलम्॥ ८१॥

अङ्गदैर्नूपुरैर्मुक्ताहारैः कौस्तुभकुण्डलैः।
भान्तं स्मरतु मे राम वरं नान्यं वृणे प्रभो॥ ८२॥

## श्री-राम उवाच

भवत्वेवं महाभागे गच्छ त्वं बदरीवनम्।
तत्रैव मां स्मरन्ती त्वं त्यक्त्वेदं भूतपञ्चकम्।
मामेव परमात्मानमचिरात्प्रतिपद्यसे॥ ८३॥

श्रुत्वा रघूत्तमवचोऽमृतसारकल्पं
गत्वा तदैव बदरीतरुखण्डजुष्टम्।
तीर्थं तदा रघुपतिं मनसा स्मरन्ती
त्यक्त्वा कलेवरमवाप परं पदं सा॥ ८४॥

॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे षष्ठे सर्गे स्वयम्प्रभा-मोक्षः सम्पूर्णः ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Svayamprabha_Moksha.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits